श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्गोपालार्य महादेशिकैः अनुगृहीतम्

# ॥ श्री अपर्याप्तामृतमङ्गळाशासन स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अपर्याप्तामृतमङ्गळाशासन स्तोत्रम् ॥

श्रीकृष्ण देशिक पदाम्बुज भृङ्गराजं
वेदान्त लक्ष्मणमुनीन्द्र कृपात्त बोधम्।
त्रय्यन्तदेशिक -यतीन्द्र -शठारि मूर्तिं
गोपालदेशिकशिखामणिमाश्रयामः॥

शठरिपुमुनि सूक्ति श्रीमदाम्नाय वाचां
अकृतक वचनानां चातिकल्याण घोषैः।
अनुदिनं अभिवृद्धां आगमान्तार्य सूक्त्या
श्रियं उपचिनु शार्ङ्गिन् वैदिकेऽस्मिन् विमाने॥ 1 ॥

महित विहित वेदान्तार्य सम्मान शीलां
अपगत तदमित्रां अद्भुतैरासमेताम्।
निरवधि धन धान्यां उत्सवैः स्त्यानहर्षां
श्रियं उपचिनु शार्ङ्गिन् वैदिकेऽस्मिन् विमाने॥ 2 ॥

श्री शार्ङ्गपाणे यदि ते परत्वं
सत्या यदि स्यात् श्रुतिरत्र मानम्।
वेदान्त सूरौ द्विषतो जनांस्त्वं
श्री कुम्भघोणे विनिवारयाशु॥ 3 ॥

पश्येम शार्ङ्गिन् ! शरदां शतं त्वां
पर्याप्तिहीनामृत नामधेयम्।

श्रीकुम्भघोणे नगरोत्तमेऽस्मिन्
निर्व्याकुलाश्चैव निरामयाश्च ॥ 4 ॥

॥ इति श्री अपर्याप्तामृतमङ्गळाशासन स्तोत्रं समाप्तम् ॥